षच, समवाये। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) सचति। इति दुर्गादासः॥

षच, ङ सेचने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ङ, सचते जलं मेघः। इति दुर्गादासः॥

षट, अंशके। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) अंशके अवयवे। सटति पटः अवयवी स्यादित्यर्थः। इति दुर्गादासः॥

षट्, [ष्] त्रि, संख्याविशेषः। छय इति भाषा। तद्वाचकानि यथा। वचकोषः १ त्रिशिरोनेत्रम् २ तर्कः ३ अङ्गम् ४ दर्शनम् ५ चक्रवर्त्ती ६ कार्त्तिकेयमुखम् ७ गुणः ८ रसः ९ ऋतुः १० ज्वरवाहुः ११ रूपम् १२। इति कविकल्पलता॥

षट्कर्म्म, [न्] क्ली, (षट्प्रकारं कर्म्म।) षट्प्रकारशान्त्यादिकर्म्म। यथा, शारदायाम्।
"अथाभिधास्ये तन्त्रेऽस्मिन् सम्यक् षट्कर्म्मलक्षणम्।
सर्व्वतन्त्रानुसारेण प्रयोगः फलसिद्धिदः॥
शान्तिवश्यस्तम्भनानि विद्वेषोच्चाटने ततः।
मारणान्तानि शंसन्ति षट्कर्म्माणि मनीषिणः॥
रोगकृत्या ग्रहादीनां निरासः शान्तिरीरिता।
वश्यं जनानां सर्व्वेषां विधेयत्वमुदीरितम्॥
प्रवृत्तिरोधः सर्व्वेषां स्तम्भनं तदुदाहृतम्।
स्निग्धानां क्लेशजननं मिथोविद्वेषणं मतम्॥
उच्चाटनं स्वदेशादेर्भ्रंशनं परिकीर्त्तितम्।
प्राणिनां प्राणहरणं मारणं तदुदाहृतम्॥
स्वदेवतादिक्कालादीन् ज्ञात्वा कर्म्माणि साधयेत्।
रतिर्वाणी रमा ज्येष्ठा दुर्गा काली यथाक्रमम्।
षट्कर्म्मदेवताः प्रोक्ताः कर्म्मादौ ताः प्रपूजयेत्॥
ईशचन्द्रेन्द्रनिर्ऋतिवाय्वग्नीनान्दिशो मताः।
सूर्य्योदयं समारभ्य घटिकादशकं क्रमात्॥
ऋतवः स्युर्व्वसन्ताद्याः अहोरात्रं दिने दिने।
वसन्तग्रीष्मवर्षाख्यशरद्धेमन्तशैशिराः॥"
यद्वा,—
"अर्द्धरात्रं शरत्कालो हेमन्तस्तु प्रभातकः।
पूर्व्वाह्णश्च वसन्तः स्यात् मध्याह्नो ग्रीष्म एव च॥
प्रावृड़् रूपोऽपराह्णः स्यात् प्रदोषः शिशिरः स्मृतः॥"
अथवा,—
"ऊषोयोगे च हेमन्तः प्रभाते शिशिरागमः।
प्रहरार्द्धे वसन्तः स्यात् ग्रीष्मो मध्यन्दिनागमे।
तुर्य्ययामे च वर्षाख्यः शरदस्तं गते रवौ॥"*॥
अथ कालनियमः।
"हेमन्तः शान्तिके प्रोक्तो वसन्तो वश्यकर्म्मणि।
शिशिरं स्तम्भने प्रोक्तो विद्वेषे ग्रीष्म एव च।
प्रावृड़ुच्चाटने ज्ञेया शरन्मारणकर्म्मणि॥"*॥
अथ तिथिनियमः।
"पञ्चमी च द्वितीया च तृतीया सप्तमी तथा।
बुधेज्यवारसंयुक्ता विज्ञेया द्वेषकर्म्मणि॥
कृष्णा चतुर्द्दशी तद्वदष्टमी मन्दवारकाः।
उच्चाटने तिथिः शस्ता प्रदोषे च विशेषतः॥
चतुर्द्दश्यष्टमी कृष्णा अमावास्या तथैव च।
मन्दभौमदिनोपेता शस्ता मारणकर्म्मणि॥
बुधचन्द्रदिनोपेता पञ्चमी दशमी तथा।
पौर्णमासी तु विज्ञेया तिथिः स्तम्भनकर्म्मणि॥
शुभग्रहोदये कुर्य्यात् शुभानि च शुभोदये।
रौद्रकर्म्माणि रिक्तार्क्के मृत्युयोगे च मारणम्॥*
जपेत् पूर्व्वमुखो वश्ये दक्षिणस्याभिचारके।
पश्चिमे स्तम्भनं विद्यात् उत्तरे शान्तिकं भवेत्॥
आकर्षणमथाग्नेये नैर्ऋते मारणं तथा।
उच्चाटनन्तु वायव्ये ऐशान्यां मोक्षदायकम्॥*॥
यथाभिचारे कार्य्या च दक्षिणाप्लवना मही।
वसनं लोहितं प्रोक्तं उष्णीषं लोहितं स्मृतम्॥
भूषणं लोहद्रव्येण वामेन पूजनादिकम्।
नरस्यायुविशेषेण मारणे रज्जुरीरिता।
मृतस्य युद्धशून्यस्य दन्तस्य गर्द्दभस्य वा।
कलाचमालां जप्तव्यं शत्रूणां वधमिच्छता॥
भग्नेभदन्तमणिभिर्जपेदाकर्षकर्म्मणि।
साध्यकेशसूत्रप्रोतस्तुरङ्गदशदनोद्भवैः।
अक्षमालां समालोक्य विद्वेषोच्चाटने जपेत्॥*
पद्माख्यं स्वस्तिकं भूयो विकटं कुक्कुटं पुनः।
वज्रं भद्रकमित्याहुरासनानि मनीषिणः॥
पद्मासनन्तु संयोज्य जान्वोरन्तरे करौ।
निवेश्य भूमौ संस्थाप्य व्योमस्थं कुक्कुटासनम्॥
अन्यानि वक्तव्यानि॥*॥
"पद्ममुद्राः क्रमतो ज्ञेयाः पद्मपाशगदाह्वयाः।
मुषलाशनिखड्गाख्याः शान्तिकादिषु कर्म्मसु॥
जलं शान्तिविधौ शस्तं वश्ये वह्निरुदीरितः।
स्तम्भने पृथिवी शस्ता विद्वेषे व्योम कीर्त्तितम्॥
उच्चाटने स्मृतो वायुर्भूयोऽग्निर्म्मारणे स्मृतः।
तत्तद्भूतोदये सम्यक् तत्तन्मण्डलसंयुतम्।
तत्तत् कर्म्म विधातव्यं मन्त्रिणा नियतात्मना॥*
पीतांशुसलिलक्षौणीव्योमवायुहविर्भुजाम्।
वर्णाः स्युर्मन्त्रबीजानि षट्कर्म्मसु यथाक्रमम्॥
ग्रथनञ्च विदर्भश्च संपुटो रोधनं तथा।
योगः पल्लव इत्येते विन्यासाः षट्सु कर्म्मसु॥
मन्त्रार्णान्तरितान् कुर्य्यात् साध्यवर्णान् यथाविधि।
ग्रथनं तद्विजानीयात् प्रशस्तं शान्तिकर्म्मणि॥
मन्त्रार्णद्वयमध्यस्तं साध्यानामाक्षरं लिखेत्॥
विदर्भ एष विज्ञेयो मन्त्रिभिर्व्वश्यकर्म्मणि॥
आदावन्ते च मन्त्रः स्यान्नामासौ संपुटः स्मृतः।
एष स्यात् स्तम्भने शस्त इत्युक्तो मन्त्रवेदिभिः॥
नाम्न आद्यन्तमध्येषु मन्त्रः स्याद्रोधनं मतम्।
विद्वेषणविधानेषु प्रशस्तमिदमीरितम्॥
मन्त्रस्यान्ते भवेन्नामयोगः प्रोच्चाटने मतः।
अन्ते नाम्नो भवेन्मन्त्रः पल्लवो मारणे मतः॥
सितरक्तपीतमिश्रकृष्णधूम्राः प्रकीर्त्तिताः।
वर्णतो मन्त्रसंप्रोक्ता देवताः षट्सु कर्म्मसु॥*॥
मन्त्राणां लिखनद्रव्यं चन्दनं रोचनं निशा।
गृहधूमचिताङ्गारौ मारणेऽष्ट विषाणि च॥
श्वेनाग्निलोलपित्तानि धुस्तूरकरसस्ततः।
गृहधूमस्त्रिकटुकं विषाष्टकमितीरितम्॥
देवताकालमुद्रादीन् सम्यक् ज्ञात्वा विचक्षणः।
षट्कर्म्माणि प्रयुञ्जीत यथोक्तफलसिद्धये॥*॥
उच्चाटने वषट् प्रोक्तं हुँ फड़न्तञ्च मारणे।
स्तम्भने च नमः प्रोक्तं स्वाहा शान्तिकपौष्टिके॥
होमतर्पणयोः स्वाहा न्यासपूजनयोर्न्नमः।
मन्त्रान्ते योजयेन्मन्त्री जपकाले यथास्थिति॥"
अस्यार्थः। एतानि तत्तत्कर्म्मणि जपकाले मन्त्रान्ते योजयित्वा मन्त्रं जपेत्। होमादिषु नायं नियमः। होम इति क्वचित् तत्र।
"शान्तिकार्य्ये जपेत् स्वाहा नमः सर्व्वत्र चार्च्चने
शान्तिपुष्टिवषड्वै वाकर्षोच्चाटनमारणे॥
स्वाहा-स्वधा-वषट्-हुम् वौषट् फट् योजयेत् क्रमात्।
वश्याकर्षणसन्तापज्वरे स्वाहा प्रकीर्त्तिता॥
क्रोधोपशमने शान्तौ प्रीतौ योज्यं नमो बुधैः।
वौषट् सम्मोहनोद्दीपपुष्टिमृत्युञ्जयेषु च॥
हुङ्कारं प्रीतिनाशे च मारणे च्छेदने तथा।
उच्चाटने च विद्वेषे वषट् पङ्क्तौ वषट्।
मन्त्रोद्दीपनकार्य्येषु लाभालाभे वषट् स्मृतः॥"
इति विशेषवचनाद्धोमे नायं विधिः॥*॥
शान्तिकादौ मन्त्रलिखनपत्रादिनियमस्तत्र एव
"शान्तिके राजतं ताम्रं भूर्ज्जपत्रञ्च वश्यके।
सर्व्वकार्य्येषु सौवर्णं क्रूरे स्यात् प्रेतकर्पटम्॥
त्रिगन्धं शान्तिके प्रोक्तं पञ्चगन्धन्तु वश्यके।
सर्व्वकार्य्येऽष्टगन्धः स्यात् क्रूरे चाष्टविषाणि च
शान्तिके लेखनी दूर्व्वा वश्यादौ शिखिपुच्छिका॥
हेम्ना सर्व्वाणि कार्य्याणि क्रूरे स्यात् काकपुच्छिका॥
गृहेषु शान्तिकर्म्म स्यात् वश्यञ्च चण्डिकागृहे
देवालये च सर्व्वाणि श्मशाने क्रूरकर्म्म च।"*॥
अथ भूतानामुदयः।
"दण्डाकारा गतिर्भूमेः पुटयोरुभयोरपि।
तोयस्य पावकस्योर्द्धं गतिस्तिर्य्यक् नभस्वतः॥
गतिर्व्योम्नो भवेन्मध्ये भूतानामुदयः स्मृतः।
धरित्र्युदये कुर्य्यात् स्तम्भनं वश्यमात्मवित्॥
शान्तिकं पौष्टिकं कर्म्म तोयस्य समये वसोः।
मारणादीनि मरुतो विपक्षोच्चाटनादिके।
क्ष्वेड़ादिनाशने शस्तमुदये च विहायसः॥"*॥
अथ भूतानां मण्डलानि।
"वृत्तं दिवस्तत् षड्बिन्दुलाञ्छितं मातरिश्वनः।
त्रिकोणं स्वस्तिकोपेतं वह्नेरर्द्धेन्दुसंयुतम्॥
अम्भोजमम्भसो भूमेश्चतुरस्रं सवज्रकम्।
तत्तद्भूतसमाभानि मण्डलानि विदुर्बुधाः॥
वर्णैः स्वे रञ्जितान्याहुः स्वस्वनामाङ्कितान्यपि।
स्वयं वियत् मरुत् कृष्णो रक्तोऽग्निर्विषदं पयः॥"
पीड़ाभूतादिप्रयोगमन्तरं कुलार्णवे।
"एकलक्षं जपेन्मन्त्रं ध्यानन्याससमन्वितम्।
प्रयोगदोषशान्त्यर्थमात्मरक्षार्थकारणम्
न चेत् फलञ्च नाप्नोति देवताशापमाप्नुयात्॥"
यत्तु।
"न शस्तं मारणं कर्म्म कुर्य्याच्चेदयुतं जपेत्।"